# गीर्वाणवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# अथ तृतीयाविभक्तिः

# तृतीयाविभक्तिः

- क्रियायां यत् साधनं भवति, तस्य तृतीयाविभक्तिः भवति।

यथा

सः दण्डेन शुनकं ताडयति।
सा कर्तर्या कागदं कर्तयति।
अहं करवस्त्रेण मुखं मार्जयामि।

# वाक्ये प्रयाणसाधनस्य तृतीयाविभक्तिः भवति।

- प्रयाणसमये यत् वाहनम् उपयुज्यते, तत् प्रयाणसाधनम्। तस्य तृतीयाविभक्तिः।

यथा-

- सः द्विचक्रिकया विद्यालयं गच्छति।
- सः कार् यानेन नगरं गच्छति।
- सा व्योमयानेन विदेशं गच्छति।

# वाक्ये भावसूचकानां शब्दानामपि तृतीयाविभक्तिः भवति

- बालकः सन्तोषेण क्रीडति।
- सः परिश्रमेण कृषिं करोति।
- व्याघ्रं दृष्ट्वा पान्थः भयेन कम्पते।
- पराजयं प्राप्य सः निराशया प्रतिगतवान्।

# तृतीयां प्रयुज्य वाक्यानि रचयन्तु

| कोपः | चिन्तनं |
| --- | --- |
| ईर्ष्या | अविवेकः |
| असूया | अनारोग्यं |
| आनन्दः | भावना |
| भयं | निराशा |
| सुखं | परिश्रमः |

# सहशब्दयोगे तृतीयाविभक्तिः भवति।

- पिता पुत्रेण सह नगरं गच्छति।
- सीता रामेण सह वनं गतवती।
- राजा सैनिकैः सह युद्धार्थं गच्छति।
- वैद्यः अस्वस्थैः सह सम्भाषणं कृतवान्।

# कः केन सह किं कृतवान्

| रामः | | लक्ष्मणः वनं गतवान् |
|---|---|---|
| अरिः | | कृष्णः युद्धं कृतवान् |
| रघुः | सह | भीमः विवादं कृतवान् |
| सुधामः | | गोपालः अधीतवान् |
| सः | | बालकः क्रीडितवान् |

# का कया सह किं कृतवती

| सीता | | गीता मन्दिरं गतवती |
|---|---|---|
| लक्ष्मीः | | विष्णुः निवसति |
| वधूः | सह | वरः विवाहं कृतवान् |
| सा | | माधुरी गीतं गायति |
| माता | | बालकः क्रीडितवान् |

# विना योगे तृतीयाविभक्तिः भवति।

- धनेन विना जीवनं नास्ति।
- लेखन्या विना लेखनं न भवति।
- जलेन विना जलचराः न जीवन्ति।
- आत्मविश्वासेन विना कार्यं कर्तुं न शक्यते।

# वाक्ये कारणसूचकानां (हेतुवाचकानां) शब्दानामपि तृतीयाविभक्तिः भवति।

- मम आगमनेन सः सन्तुष्टः।
- धावनेन मार्गे पतितः।
- दैवानुग्रहेण अपायो न जातः।
- शिरोवेदनया कार्यालयं न गतवान्।

# तृतीयां प्रयुज्य वाक्यानि रचयन्तु

| आगमनं | गमनं |
|---|---|
| चलनं | धावनं |
| कूर्दनं | क्रीडनं |
| ध्यानं | स्मरणं |
| पठनं | पाठनं |
| श्रवणं | भाषणं |
| पठनं | लेखनं |
| पारायणं | कथनं |
| खादनं | पानं |

# वाक्ये धनवाचक(रूप्यक)शब्दस्य तृतीयाविभक्तिः भवति।

- यदा वयं किमपि क्रेतुं धनं दद्मः, तदा तस्य तृतीयाविभक्तिः भवति।

  यथा-
- सः दशरूप्यकैः लेखनीं क्रीतवान्।
- सा अष्टरूप्यकैः पुस्तकं क्रीतवती।
- सः शतरूप्यकैः स्यूतं क्रीतवान्।
- सा पञ्चरूप्यकैः कन्दुकं क्रीतवती।

# अलं योगे तृतीयाविभक्तिः भवति।

- निषेधार्थक अलं शब्दः यत्र प्रयुज्यते तत्र तृतीयाविभक्तिः भवति।

  यथा-

  बालाः! तूष्णीं तिष्ठन्तु। अलं कोलाहलेन।
  मित्र! अलं साहसेन ।
  पुत्र! अलं धावनेन।

# तृतीयां प्रयुज्य वाक्यानि रचयन्तु

| | | **धावनं** |
|---|---|---|
| | | क्रीडनं |
| हे मित्र ! | | स्मरणं |
| | | पठनं |
| हे सखि ! | अलं | भाषणं |
| | | लेखनं |
| हे हरे ! | | कथनं |
| | | अध्ययनं |

# तृतीयाविभक्तिः कुत्र कुत्र भवति इति पश्यामः

- क्रियायां यत् साधनं भवति, तस्य
- वाक्ये प्रयाणसाधनस्य
- भावसूचकानां शब्दानाम्
- सहशब्दयोगे अपि च

- विना योगे
- वाक्ये कारणसूचकानां (हेतुवाचकानां) शब्दानाम्
- वाक्ये धनवाचक(रूप्यक)शब्दस्य
- अलं योगे च तृतीयाविभक्तिः भवति ।

धन्यवादाः